**दिनाङ्कः 13.04.2026**

**प्रातः - 06:55**

# संस्कृत वार्ताः

## अथ वार्ताः

### पीएम-नारी शक्ति सम्मेलन

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदेहली-नगरे "नानशक्ति वन्दन् सम्मेलनम्" इति सम्बोधयिष्यते। भारतीय- विकास- मार्गस्य निर्माणे महिलानां महत्तर-सहभागितायाः प्रतिबद्धतां सुदृढं कर्तुं राष्ट्रिय-स्तरस्य सम्मेलनस्य आयोजनं क्रियते। सम्मेलनमेतत् पञ्चायत इत्यतः संसत्-पर्यन्तं सर्वेषु स्तरेषु शासनस्य नेतृत्वे महिलानां वर्धमानां भूमिकां प्रकाशयिष्यति। कार्यक्रमः निर्णयप्रक्रियासु महिलानां वर्धित-प्रतिनिधित्वस्य महत्त्वम् अपि अधोरेखितुं शक्नोति। विविधक्षेत्राणां महिला-

साधकाः, सर्वकारस्य, शैक्षणिकक्षेत्रस्य, विज्ञानस्य, क्रीडायाः, उद्यमशीलतायाः, प्र सारमाध्यमस्य, सामाजिककार्यस्य, संस्कृतेः इत्यादीनां विभिन्नक्षेत्राणां प्रतिनिधयः अस्मिन् कार्यक्रमे भागं ग्रहीष्यन्ति। सम्मेलनम् सप्तचत्वारिंशदधिकद्विसहस्र-तमवर्षपर्यन्तं विकसितराष्ट्रं कर्तुं भारतस्य यात्रायां महिलानां भूमिकां प्रकाशयिष्यति।

### रिजिजु नारी शक्तिः

संसदीयकार्यमन्त्री किरेन रिजिजुः अवदत् यत् भारतस्य महिलाभ्यः कृतानि आश्वासनानि भ्रामक राजनीतिः भवितुं न शक्नोतीति। सामाजिक-प्रसारमाध्यमे श्रीरिजिजूः अवदत् यत् अद्य यदा नारीशक्ति-वन्दन्-अधिनियम इत्यस्य वितरणस्य

समयः अस्ति, दशकान् यावत् महिला-आरक्षणम् आश्वासनमेव आसीत्, अयं सर्वकारः तत् वास्तविकतायां पर्यवर्तयत् इति।

## पी एम्-डब्ल्यू बी राली:

भाजपा-पक्षस्य वरिष्ठः नेता प्रधानमन्त्री च नरेन्द्रमोदी उक्तवान् यत् सिलीगुडीति क्षेत्रं राष्ट्रस्य सुरक्षायै अति महत्वपूर्णमस्ति, तस्य सुरक्षायै सर्वकारः सर्वविध प्रयत्नान् कुर्वन् अस्ति इति। प्रधानमन्त्री पश्चिमबङ्गस्य सिलिगुडी-नगरस्य कवखली क्षेत्रे ह्यः जनसभाम् सम्बोधयन् आरोपम् अकरोत् यत्, सत्ताधारी-तृणमूल्-काङ्ग्रेस्-पक्षः मदरसा-विद्यायाः विकासाय षट्-सहस्र-कोटिरूप्यकाणि विनियोजयति, पूर्वोत्तरस्य प्रवेशद्वारभूताय उत्तरवङ्गाय च आयव्ययिक-आबंटनं प्रदातुं असफलः अस्तीति।

## पश्चिमबङ्गे प्रचाराभियानम्

पश्चिमबङ्गस्य विधानसभा-निर्वाचनात् पूर्वं प्रचारः तीव्रः भवति। भाजपा-पक्षस्य वरिष्ठः नेता तथा केन्द्रीय-गृहमन्त्री अमितशाहः अद्य बीरभूम-पश्चिम-बर्धमान-क्षेत्रयोः सघन-प्रचारे भविष्यति। श्रीशाहः अद्य अपराह्णे बीरभूम्- सैन्थिया इति क्षेत्रस्य पल्ली-मङ्गल-क्लब्-ग्राउण्ड् इत्यत्र जनसभया प्रचारम् आरप्स्यते। सः तस्यैव मण्डलस्य खैरसोल्-नगरे गोस्तो-दङ्गल्-मैदान इति क्रीडाङ्गणे अन्यं समागमं सम्बोधयिष्यति। अपरत्र, तृणमूल्-काङ्ग्रेस् इत्यस्य प्रमुखा ममता-बैनर्जी अपि अद्य सम्पूर्णे राज्ये बहुविध-प्रचारकार्यक्रमान् आयोजयिष्यति। दलस्य मूल्यानाम् अनुगुणं सा अद्य प्रातः बीरभूम्-मण्डलस्य सूरी-क्षेत्रे जनसभां करिष्यति। पश्चात् सा पूर्व-बर्धमान्-नगरस्य गल्सीति क्षेत्रे जनसभां करिष्यति।

## राष्ट्रपतिः-भ्रमणम्

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अद्यारभ्य गुजरातमहाराष्ट्रयोः चतुर्दिवसीययात्रायां भविष्यति। अद्य राष्ट्रपतिः एम्स्-राजकोट इत्यस्य प्रथम-दीक्षान्त-समारोहेऽपि भागं ग्रहीष्यति। श्वः राष्ट्रपतिः डा. बी. आर्. अम्बेडकरस्य जन्मवार्षिक्यावसरे गान्धीनगरस्य लोकभवने "सामाजिकसमरसता महोत्सव" इत्यस्मिन् भागं

ग्रहीष्यति। सा गांधीनगरे एव राष्ट्रिय-रक्षा-विश्वविद्यालयस्य पञ्चम-दीक्षान्त-समारोहे अपि भागं ग्रहीष्यति।

## जयशङ्कर-यू. ए. ई. भ्रमणम्

विदेश-कार्यमन्त्री डा. एस्. जयशङ्करः संयुक्त-अरब्-अमिरात्-देशस्य द्विदिवसीय-आधिकारिकयात्रां समापयत्, येन अमिरात-नेतृभिः सह उच्च-स्तरीय-मेलनं समापितम्।

## आशा भोसले

सुप्रसिद्धगायिकायाः आशा भोसले इत्यस्याः अन्तिमसंस्कारः अद्य सायं चतुर्वादने मुम्बै-नगरस्य शिवाजी-उद्याने राज्य-सम्मानेन भविष्यति। सा ह्यः द्विनवतितमे वयसि मुम्बै-चिकित्सालये दिवंगता। प्रसिद्धगायकत्वेन प्रसिद्धा आशाताई इत्येषा पद्मविभूषणं, महाराष्ट्रभूषणपुरस्कारं च सम्प्रातासीत्।

## जम्मू-कश्मीर- श्रीअमरनाथ जी यात्रा

वार्षिक-अमरनाथ-यात्रा अस्मिन् वर्षे जुलै-मासस्य त्रिदिनाङ्कादारभ्य आगस्ट्-मासस्य अष्टविंशति दिनाङ्के रक्षाबन्धने समाप्स्यते। जम्मू-कश्मीर्-राज्यस्य उपराज्यपालः मनोजसिन्हः पत्रकारसम्मेलने अघोषयत् यत् यात्रायाः अग्रिम-पञ्जीकरणम् अस्य मासस्य पञ्चदश दिनाङ्कतः आरप्स्यते।

## आई.पी.एल. क्रिकेट्ः

आईपीएल क्रिकेटक्रीडायां, रॉयल चैलेंजर्स बैंग्लोरदलं गतरात्रौ मुम्बै-नगरे मुम्बै-इण्डियन्स्-दलं अष्टादशधावनाङ्कैः पराजयत। अद्यतनायां क्रीडायां हैदराबाद्-नगरे सन् राइजर्स्-हैदराबाद्, राजस्थान्-रायल्स् इत्येते दले क्रीडिष्यतः।

॥ इति वार्ताः॥